शिरोविरेचनानि। न त्वनुवासनं तस्य हंहणत्वात्। अत्र लङ्घनं कर्षणमित्यर्थः। तथा च सुश्रुतः।

"शरीरलाघवकरं यद्द्रव्यं कर्म वा पुनः।
तल्लङ्घनमिति ज्ञेयं बृंहणन्तु पृथग्विधम्॥

लङ्घनात् कर्षणादन्यत् शरीरपोषकमित्यर्थः॥*॥ ननु आमहृत्तिमितेर्हेतुरित्यादिपूर्ब्बोक्तसुश्रुतवचनात् सामान्यतो ज्वरिणा यथाशनरूपं लङ्घनं क्रियते तथा चतुःप्रकारा संशुद्धिः इत्यादिचरकवचनाद्वमनादिरूपं लङ्घनं सर्व्वैर्ज्वरिभिः कथं न क्रियते। तत्रोच्यते। वमनादिकमवस्थाविशेषेषु क्रियते न तु सर्व्वज्वरेषु। तथा च सुश्रुतः।

"श्लेष्मोत्क्लिष्टे बलिने देयं वमनं श्लेष्मिके ज्वरे।
पित्तप्राये विरेकस्तु कार्य्यः प्रशिथिलाशये॥"

प्रशिथिलाशये अत्र प्रोपसर्गः वैपरीत्ये तेन गूढाशये इत्यर्थः॥*॥

"सरुजेऽनिलजे कार्य्यं सोदावर्त्ते निरूहणम्।
कफाभिपन्ने शिरसि कार्य्यं मूर्द्धविरेचनम्॥"

अपि च। सर्व्वज्वरिभिः पिपासानिग्रहश्च न कार्य्यः॥ यत आह हारीतः।

"तृष्णा गरीयसी घोरा सद्यःप्राणविनाशिनी।
तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम्॥"

अतोऽवस्थाविशेष एव पिपासासहनम्॥*॥ ज्वरिभिर्म्मारुतसेवनं न कार्य्यम्। सुश्रुतेन प्रवातसेवनस्य सर्व्वथा निषिद्धत्वात् अतो मारुतसेवनं अवस्थाविशेष एव युक्तम्। आतपसेवनञ्चावस्थाविशेष एव संग्रहीतम्॥*॥

"लङ्घनाम्बुयवागूभिर्य्यदा दोषो न पच्यते।
तदा तं मुखवैरस्यतृष्णारोचकनाशनैः॥
ज्वरघ्नैः पाचनैर्हृद्यैः कषायैः समुपाचरेत्।"

इत्यत्र लङ्घनपाचनयोः स्फुट एव भेदः। व्यायामोऽपि न कार्य्यस्तस्यातिनिषिद्धत्वात्। अवस्थाविशेषे पुनःपार्श्वपरिवर्त्तनादिरूपः सोऽपि कर्त्तव्यः। तस्माच्चतुःप्रकारां संशुद्धिरित्यादिश्लोके लङ्घनपदं कर्षणपर्य्यायमिति निर्णीतम्॥ अनशनरूपस्य लङ्घनस्य फलमाह।

"लङ्घनेन क्षयं नीते दोषे सन्धुक्षितेऽनले।
विज्वरत्वं लघुत्वञ्च क्षुच्चैवास्योपजायते॥
लङ्घनेन अनशनेन दोषे प्रवृद्धे क्षयं नीते।
यत आह।

"आहारं पचति शिखी दोषानाहारवर्ज्जितः।"

पचतीति। सन्धुक्षितेऽनले अभिच्छादकदोषे संक्षीणे अग्नौ प्रदीप्ते। यथोक्तसप्राप्तिसामग्रीविघटनात्। विज्वरत्वं शरीरस्य गौरवाभावेन लघुत्वम्। क्षुत् बुभुक्षा च जायते इत्यर्थः॥*॥ अन्यच्चाह सुश्रुतः।

"अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम्।
ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम्॥

अनवस्थितदोषाग्नेः अनवस्थितः स्वस्थानादिचलितो मलो दोषोऽग्निश्च यस्य तस्य ज्वरिणः। काङ्क्षा अन्नाभिलाषः। रुचिः लङ्घनेनामपाकाभुक्तशोषादिनापि मुखस्य यत् प्रहृतत्वं सैव रुचिः शोभा। रुचिः स्त्री दीप्तौ शोभायामभिलाषयोरिति मेदिनीकारः॥*॥ संप्रति कृतस्य लङ्घनस्य लक्षणमाह।

"वातमूत्रपुरीषाणां विसर्गाद्गात्रलाघवे।
हृदयोद्गारकण्ठास्य शुद्धौ तन्द्राक्लमे गते॥
स्वेदे जाते रुचौ वापि क्षुत्पिपासासहोदये।
कृतं लङ्घनमादेश्यं निर्व्यथे चान्तरात्मनि॥"

हृदयस्य शुद्धिरनवरोधः। उद्गारशुद्धिःसधूमाम्लोद्गाराभावः। कण्ठस्य शुद्धिः कफाद्यलिप्तत्वम्। आस्यशुद्धिः मुखस्य प्रकृतरसत्वम्। तन्द्राक्लमे तन्द्रया क्लमः तस्मिन्। तन्द्रा निद्रावत्। क्लमोऽत्र ग्लानिः। क्षुत्पिपासासहोदये क्षुत्पिपासाभ्यां सह युगपदुदये। अन्तरात्मनि मनसि। एतानि लक्षणाति मिलितान्येव सम्यक् कृतं लङ्घनं बोधयन्ति। न तु प्रत्येकम्॥*॥ हीनस्य लङ्घनस्य लक्षणमाह।

"कफोत्क्लेशः सहृल्लासः ष्ठीवनञ्च मुहुर्म्मुहुः।
कण्ठास्यहृदयाशुद्धिस्तन्द्रा स्याद्धीनलङ्घने॥
कफोत्क्लेशः कफस्य वमनायोपस्थितिः॥"

हृल्लासः हृदयात् कफस्य निर्गमः॥*॥ अतिशयितस्य लङ्घनस्य लक्षणमाह।

"पर्व्वभेदोऽङ्गमर्द्दश्च कासः शोषो मुखस्य च।
क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्ब्बल्यं श्रोत्रनेत्रयोः॥
मनसः संभ्रमोऽभीक्ष्णमूर्द्धवातस्तमो हृदि।
देहाग्निबलहानिश्च लङ्घनेऽति कृते भवेत्॥

दौर्ब्बल्यं श्रोत्रनेत्रयोः कर्णनेत्रयोः स्वविषयग्रहणासामर्थ्यम्। मनसः संभ्रमः भ्रान्तिः। ऊर्द्धवात उद्गारबाहुल्यम्। हृदि तमः अन्धकारप्रविष्टस्येव ज्ञानम्॥*॥ बलं रक्षन् लङ्घनं कारयेदित्याह।

"बलाविरोधिना चैनं लङ्घनेनोपपादयेत्।
बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः॥

अयमर्थः। एनं ज्वरिणं बलविरोधिना अनतिबलक्षयकारिणा लङ्घनेन उपपादयेत् उपचरेत्। कुत इति चेत्तत्राह। यदर्थ इति। यस्मै आरोग्याय अयं क्रियाक्रमः चिकित्सोपक्रमः। तत् आरोग्यं बलाधिष्ठानं बलाश्रयमित्यर्थः॥*॥ केषाञ्चिदनशनस्य निषेधमाह सुश्रुतः।

तद्धि मारुततृष्णाक्षुन्मुखशोषभ्रमान्वितैः।
न कार्य्यं गुर्व्विणीबालवृद्धदुर्ब्बलभीरुभिः॥
न क्षयाध्वश्रमक्रोधकामशोकचिरज्वरे।

तत् अनशनं उक्तमारुतयुक्तेन ज्वरिणा न कार्य्यम्। मारुतोऽत्र निरामो बोद्धव्यः। सामे तु मारुते लङ्घनं कार्य्यमेव। यत आह तन्त्रान्तरे।

"अवश्यमेव कुर्व्वीत ज्वरी सामे समीरणे।
लङ्घनं ह्यामपाकार्थं न तदूर्द्धं यथा कफे॥
तदूर्द्धं आमपक्वादूर्द्धम्। अतएवोक्तम्।
कफपित्ते द्रवे धातू सहेते लङ्घनं बहु।
आमलयादूर्द्धमपि वायुर्न सहते क्षयम्॥"*॥

आमस्य लक्षणमाह।

"आहारस्य रसः सारो यो न पक्वोऽग्निलाघवात्।
आमसंज्ञां स लभते बहुव्याधिसमाश्रयः॥"

तन्त्रान्तरे।

"आममन्नरसं केचित् केचित्तु मलसञ्चयम्।
प्रथमां दोषदुष्टिं वा केचिदामं प्रचक्षते॥"

अन्यच्च।

"अपि पक्वमसंसक्तं दुर्गन्धं बहुपिच्छिलम्।
सदनं सर्व्वगात्राणामाम इत्यभिशब्दितः॥
तेनामेन समायुक्ता दोषा दूष्याश्च तादृशाः।
तदुद्भवा आमयाश्च सामा इति बुधैः स्मृताः॥"

अत्र सामस्य वातस्य लक्षणमाह।

"वायुः सामो विबन्धाग्निसादतन्द्रान्त्रकूजनैः।
वेदना शोथनिस्तोदैः क्रमशोऽङ्गानि पीड़येत्॥
विचरेद्युगपच्चापि गृह्णाति कुपितो भृशम्।
स्नेहाद्यैर्वृद्धिमायाति मेघसूर्य्योदये निशि॥"

विचरेद्युगपद्वायुरामश्चैककालं विचरेत्। कुपितः सामो वायुः भृशमतिशयेन गृह्णात्यङ्गानीत्यर्थः॥*॥ तस्यैव निरामस्य लक्षणमाह।

"निरामो विशदो रूक्षो निर्व्विबन्धोऽल्पवेदनः।
विपरीतगुणैः शान्तिं स्निग्धैर्याति विशेषतः॥*॥

अथ प्रसङ्गात् सामस्य पित्तस्य लक्षणमाह।

पित्तं सामं भवेदम्लं दुर्गन्धं हरितं गुरु।
अम्लीकाकण्ठहृद्दाहकरं श्यावं तथा स्थिरम्॥

अम्लीका अम्लिलघुकी इति लोके॥*॥ तस्य निरामस्य लक्षणमाह।

"निरामं पीतमाताम्रमत्युष्णं कटुकं सरम्।
दुर्गन्धि रुचिकृद्वह्निबलवर्द्धनमीरितम्॥

अथ सामस्य कफस्य लक्षणमाह।

"आविलस्तन्तुलस्त्यानः कण्ठदेशेऽवतिष्ठति।
सामो बलाशो दुर्गन्धः क्षुदुद्गारविघातकृत्॥
स्त्यानः संहतः॥

तस्य निरामस्य लक्षणमाह।

"श्लेष्मा निरामो निर्गन्धः फेनवान्छेदवानपि।
भवेत् स पिच्छिलः पाण्डुरास्यवैरस्यनाशकृत्॥"

अथ सामस्य व्याधेर्लक्षणमाह।

"आलस्यतन्द्राहृदयाविशुद्धि-
दोषाप्रवृत्त्याविलमूत्रताभिः।
गुरूदरत्वारुचिसुप्तताभि-
रामान्वितं व्याधिमुदाहरन्ति॥
आमं जयेल्लङ्घनकोलपेया
लघ्वन्नमूपौदनतिक्तयूषैः।
विरूक्षणस्वेदनपाचनैश्च
संशोधनैरूर्द्धमधस्तथैव॥

तद्धि मारुततृष्णाक्षुदित्यादिश्लोके तृष्णापि निरामैव विवक्षिता तेन निरामतृष्णान्वितेन लङ्घनं न कार्य्यम्। सामायान्तु तृष्णायां लङ्घनं कार्य्यमेव। तथा मुखशोषभ्रमावपि निरामावेव विवक्षितौ। सामयोस्तु तयोर्लङ्घनं कार्य्यमेव। गुर्व्विणीबालवृद्धादिभिरपि निरामैरेव लङ्घनं न कार्य्यम्। सामैः पुनस्तैरपि लङ्घनं कार्य्यमेव। क्षयो धातुक्षयो राजयक्ष्मा। वातजे ज्वरे लङ्घनं न कार्य्यम्॥ ज्वरी लङ्घनेऽपि जलं पिबेदित्याह सुश्रुतः।